# पाणिनीयव्याकरणतन्त्रे प्रयुक्तानां न्यायसिद्धपरिभाषाणां विमर्शः

टीकारामदाहालः

उपप्राध्यापकः

व्याकरणविभागः

पिण्डेश्वर-विद्यापीठम्

धरान-नेपालः

*tikadahaldharan@gmail.com*

A Review of the Formation of Society-based Sub-formula in *Paniniya* Principle - by Tikaram Dahal

The article reviews the society-based rule formed by sub-formulas. There are three ways of formulating sub-formula and/or definitions: *Paniniya* formula, the social rules and explanation of theories of grammar.

**लेखसारः**

*पाणिनीयव्याकरणशास्त्रपरम्परायां भाष्यवार्तिकादिषु च ग्रन्थेषु वचनरूपेण पठिता अनेकाः परिभाषाः प्रचलिताः सन्ति । ताः कतिपयाः परिभाषाः पाणिनीयैः सूत्रैः सूत्रांशैर्वा ज्ञापिताः सन्ति । अन्याश्च कतिपयाः परिभाषा महाभाष्ये प्राचीनवार्तिकग्रन्थेषु च पठिताः सन्ति । परिभाषाः प्रदीपवत् शास्त्रस्थं ज्ञानं प्रकाशयन्ति । पाणिनीयव्याकरणशास्त्रपरम्परायां प्रचलिताः परिभाषा भाष्यवार्तिकतोऽतिरिक्तमनेकैर्मनीषिभिः समाकलिता व्याख्याताश्च सन्ति । तत्राधुना 'परिभाषाप्रदीपः' 'परिभाषाप्रदीपार्चिः' 'परिभाषेन्दुशेखर' इत्यादयः परिभाषाविषयसम्बद्धा ग्रन्थाः प्रकाशिताः प्राप्यन्ते । एतेषु नागेशविरचितः परिभाषेन्दुशेखरोऽतितरां शिखरायते । संस्कृतभाषायाः पाणिनीयव्याकरणशास्त्र-परम्परातोऽतिरिक्तासु सारस्वत-कातन्त्र-सिद्धहैमादिसंस्कृतव्याकरण-परम्परास्वपि परिभाषाणां पाठ उपलभ्यते । महर्षिणा पाणिनिना 'अष्टाध्याय्यां' सूत्ररूपेण पठिताः 'इको गुणवृद्धी', 'आद्यन्तौ टकितौ', 'अचश्च', 'स्थानेऽन्तरतमः', इत्यादिकाः परिभाषाः सूत्रात्मिकाः सन्ति । एतद्भिन्नाः प्राचीनपाणिनीय-शास्त्रेषु भाष्यवार्तिकादिषु च वचनरूपेण पठिताः परिभाषा वाचनिकाः सन्ति । पाणिनीयैः सूत्रैः सूत्रांशैर्वा ज्ञापिताः परिभाषा ज्ञापकसिद्धा मन्यन्ते । लोकव्यवहारेण नीतिना च सिद्धा तथा शास्त्रीयेन न्यायेन सिद्धाः परिभाषा न्यायसिद्धाः सन्ति । परिभाषाग्रन्थेषु सूत्रात्मिकाः परिभाषा विहायान्यविधा एव*

*परिभाषा व्याकृता विद्यन्ते । परिभाषेन्दुशेखरे नागेशेनैताः परिभाषास्त्रिषु शास्त्रत्वसम्पादन-बाधबीज-शास्त्रशेषप्रकरणेषु विभज्य व्याख्याताः सन्ति । एतासु परिभाषासु न्यायसिद्धाः परिभाषा विशेषमहत्त्वमावहन्ति । लोकनीत्यनुकूलो शास्त्रीयो व्यवहार एव न्यायसिद्धपरिभाषाणामाधारो दृश्यते । येन प्रकारेण लोकव्यवहारः सम्पद्यते तेनैव प्रकारेण व्याकरणशास्त्रे शास्त्रीयो व्यवहारश्च सम्पद्येत इति न्यायमूलकानां परिभाषाणां प्रस्थानविन्दुर्विद्यते । न्यायसिद्धाभिः परिभाषाभिस्तात्कालिकायाः समाजव्यवस्थायाश्च स्वरूपं ज्ञाप्यते । पाणिनीयव्याकरणतन्त्रे प्रसिद्धानां परिभाषाणामध्ययनक्रमे तत्रोक्तानां न्यायसिद्धानां परिभाषाणामन्वेषणायात्र मधुकरपद्धतिरवम्बिता विद्यते । न्यायसिद्धपरिभाषाणां विश्लेषणाय वर्णनात्मको विश्लेषणात्मकश्च विधिरवलम्ब्यते । पीणिनीयव्याकरणशास्त्रपरम्परायां लोकन्यायाश्रिताः शास्त्रीयन्यायाश्रिताश्चानेकाः परिभाषाः शास्त्रीयकार्यसम्पादनाय प्रयुज्यमानाः दरीदृश्यन्ते । तासामुपस्थापनमाधुनिकपद्धत्या विश्लेषणञ्चास्य लेखस्य प्राप्तिर्विद्यते ।*

**शब्दकुञ्जिका**

खिलपाठः, ज्ञापकसिद्धा, न्यायसिद्धा, वाचनिकी, सूत्रात्मिका ।

## विषय-परिचयः

आचार्यः पाणिनिर्महान् वैयाकरण आसीत् । भाषानुशासने तस्य महान् सूक्ष्मतरः प्रयत्न इदानीं यावल्लोकमुपकरोति । पाणिनेः 'अष्टाध्यायी' सूत्रात्मिकायां शैल्यां विरचिता व्याकरणविषय-सम्बद्धा कालजयी कृतिर्विद्यते । अष्टाध्यायीग्रन्थे सूत्रपाठक्रमेणाष्टास्वध्यायेषु संयोज्य ३,९९६ सङ्ख्यकानि सूत्राणि पठितानि सन्ति । पाणिनिना एतैः सूत्रैर्वैदिकलौकिकोभयविधा भाषा अनुशासिता विद्यन्ते । वेदस्य शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्यौतिषञ्चेति षडङ्गानि सन्ति । तेष्वङ्गेषु मुखमिव मुख्यमङ्गं व्याकरणमस्ति, तथा चोक्तं पाणिनीयशिक्षायाम् -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । (पाणिनीयशिक्षायाम्, श्लो. ४१-४२)

लौकिकवैदिकोभयविधभाषानुशासकं पाणिनीयं व्याकरणमन्यव्याकरणतो मुख्यं सर्वशास्त्रोपकारकं व्यापकं समुत्कृष्टं प्रथिततरञ्च मन्यते । तथा च प्रसिद्धिः - काणादं पाणिनीयञ्च सर्वशास्त्रो-पकारकमिति । एतेन पाणिनीयं व्याकरणं सर्वशास्त्रोपकारकं वेदादिशास्त्राध्ययने बोधने च क्षमतोत्पादकं मुख्यं विद्यत इति स्पष्टमेवावगम्यते ।

पाणिनीयव्याकरणशास्त्रीयायां ग्रन्थपरम्परायां मूलतो दार्शनिकार्थिकप्रक्रियाभेदेन स्रोतस्त्रयमुपस्थितं दृश्यते । आर्थिकदार्शनिकविषयौ परस्परसम्बद्धौ स्तः । तत्र भर्तृहरेः 'वाक्यपदीयम्' कौण्डभट्टस्य 'वैयाकरणभूषणसारः' नागेशस्य 'वैयाकरणसिद्धान्तमञ्जूषा' दार्शनिकांश आर्थिकांशे च प्रमुखाः कृतयः सन्ति । पाणिनेरष्टाध्याय्या व्याख्यानभूतैः काशिकादिभिर्वृत्तिभिः प्रक्रियाया विकासोऽजायत । महर्षेः पतञ्जलेः 'महाभाष्य'न्तु समेषां विषयाणां पक्षाणाञ्च सागरमिवाभाति । भट्टोजिदीक्षितनागेशौ प्रक्रियाक्रमं स्फुटतरमुच्चतरं सरलतरञ्च प्रापयामासतुः । भट्टोजिदीक्षितस्य 'वैयाकरणसिद्धान्तकौमुदी' तथा नागेशस्य मञ्जूषाशेखरौ चाधुना पाणिनीयव्याकरणस्याच्छन्नं मुखमुद्घाटयन्त विलसन्ति । आचार्यः पाणिनिः सूत्रात्मकस्याष्टाध्यायीग्रन्थस्य रचनेन सर्वं संस्कृतवाङ्मयमनुशशास । अष्टाध्यायां तु सूत्राण्येव सन्ति । तस्याः पूरकरूपेणाचार्येण पाणिनिना धातुगणोणादिपाठलिङ्गानुशासनानि विरचितानि विद्यन्ते, एतानि खिलपाठनाम्ना प्रसिद्धानि सन्ति ।

नागेशस्य 'परिभाषेन्दुशेखरः' पाणिनीयव्याकरणशास्त्रपरम्परायां प्रचलितानां परिभाषाणां सङ्कलनरूपं सयुक्तिकव्याख्यानभूतञ्च महत्त्वपूर्णं ग्रन्थरत्नमस्ति । तत्र प्राचीनपाणिनीयशास्त्रेषु भाष्यवार्तिकादिषु वचनरूपेण पठिता वाचनिकाः, पाणिनीयैः सूत्रैः सूत्रांशैर्वा ज्ञापिता ज्ञापकसिद्धाः, लौकिकव्यावहारिकनीत्यनुकूला न्यायसिद्धाश्चानेकाः परिभाषाः (१३६ संख्यकाः) त्रिषु शास्त्रत्वसम्पादन-बाधबीज-शास्त्रशेषप्रकरणेषु विभज्य व्याख्याताः सन्ति । तास्वत्रालेखे न्यायसिद्धानामेव परिभाषाणामन्वेषणं विधाय यथाप्रसङ्गं व्याकृताः सन्ति ।

## समस्याकथनम्

पाणिनीयपरम्परायां बह्व्यः परिभाषाश्च प्रचलिताः सन्ति । परिभाषेन्दुशेखरे व्याख्यातासु परिभाषासु न्यायसिद्धाः कति परिभाषाः सन्ति ? ताः परिभाषाः पाणिनीयेषु सूत्रेषु कथं सङ्घटन्ते ? अनयोः प्रश्नयोरुत्तरान्वेषणमस्यालेखस्यामुख्या समस्या विद्यते । ताः अधः सूत्रसरण्या समुल्लिख्यन्ते -

क) परिभाषेन्दुशेखरे न्यायसिद्धाः परिभाषाः कति सन्ति ?

ख) न्यायसिद्धानां परिभाषाणां पाणिनीयव्याकरण उपकारः कीदृशः ?

## उद्देश्यनिर्धारणम्

पाणिनीयपरम्परायां प्रचलिताः नागेशेन परिभाषेन्दुशेखरे व्याख्याताः न्यायसिद्धपरिभाषाणामन्वेषणं कृत्वा विवेचनमेवास्य मुख्यमुद्देश्यमस्ति । आलेखोऽयं निम्नलिखितेषूद्देश्येषु केन्द्रीकृतं विद्यते -

क) परिभाषेन्दुशेखरे स्थितानां न्यायसिद्धपरिभाषाणामन्वेषणम् ,

ख) न्यायसिद्धानां परिभाषाणां पाणिनीयव्याकरण उपकारनिरूपणम् ।

## पूर्वकार्यसमीक्षणम्

पाणिनीयव्याकरणशास्त्रपरम्परायां सूत्रतो भिन्नानां परिभाषाणां महत्वपूर्णं स्थानमस्ति । ताः परिभाषाः परिभाषाप्रदीपार्चिः परिभाषाप्रदीपः परिभाषेन्दुशेखरः इत्यादिषु ग्रन्थेषु व्याख्याताः सन्ति । परिभाषप्रदीपार्चि नामकः ग्रन्थः काष्ठमण्डपस्थे 'राष्ट्रिय अभिलेखालये' हस्तलिखितं प्रति प्राप्यते । तत्र विदुषा हेमराज पाण्डेयेन तथा सोमनाथ सिग्देल महोदयेन च तस्या व्याख्याः विहिताः इति बहुधाः श्रूयते परन्तु प्रकाशितं नोपलभ्यते भारतात्तु लभ्यते (अन्यदीया)। दीक्षितः 'वैयाकरणसिद्धान्तकौमुदी' ग्रन्थे या परिभाषा यत्र प्रक्रियाक्रमे सम्बद्धा विद्यते सा तत्रैवोपन्यसति । यथा - जराया जरसोऽन्यतरास्याम् (पा.सू.७२।१०१) सूत्रे एकदेशविकृतमनन्यवत्, तथा निर्दिश्यमानस्यादेशाः भवन्ति इति परिभाषे पठति । तथैव सर्वत्र ग्रन्थे च यथावसरं स परिभाषाः निर्दिशति । दीक्षितेन न्यायसिद्धाश्च परिभाषाः अनेनैव प्रकारेण निर्दिष्टाः विद्यन्ते । नागेशस्तु ताः परिभाषाः समाकलय्य 'परिभाषेन्दुशेखरः' नामके ग्रन्थे व्यख्यानमास्ते । न्यायमूलकाः वाचनिक्यः व्यवहारमूलकाः परिभाषाः कथं सिद्धाः तथा लक्ष्ये कथं सङ्घटन्ते स्पष्टमुपदिशति । नागेशेन परिभाषेन्दुशेखरे प्राचीनपाणिनीयशास्त्रेषु भाष्यवार्तिकादिषु वचनरूपेण पठिताः वाचनिकाः पाणिनीयैः सूत्रैः सूत्रांशैर्वा ज्ञापिताः ज्ञापकसिद्धाः न्यायसिद्धाश्चानेकाः १३३ संख्यकाः परिभाषाः त्रिषु शास्त्रत्वसम्पादन-बाधबीज-शास्त्रशेषप्रकरणेषु विभज्य व्याख्याताः सन्ति । सूत्ररुपेण पठिताः परिभाषाः अध्येतृणां विषयपथमागताः विलोक्यन्ते परन्तु वाचनिन्यः न्यायमूलकाश्च परिभाषाः पृथक्तयाध्ययनानुसन्धानविषयभूताः स्वल्पतयैवावलोक्यन्ते । तस्मादेवास्मिन्नालेखे तत्र प्राप्तानां न्यायसिद्धानां परिभाषाणां स्वरुपोपस्थापनायप्रयत्नः विहितः वर्तते ।

## अनुसन्धानविधिः सीमा च

पाणिनीयव्याकरणशास्त्रपरम्परायां प्रचलिताः नागेशेन परिभाषेन्दुशेखरे समाकलिताः न्यायसिद्धाश्च ताः परिभाषाः समन्वीय विश्लेषणमेवास्यालेखस्यालेखस्य मुख्यं क्षेत्रमस्ति । तत्रस्थानां न्यायसिद्धानां परिभाषाणामेव विमर्शणमस्यालेखस्य सीमा विद्यते । अस्यानुसन्धानकार्यस्य सम्यक्तया सम्पादनाय सामग्रीसङ्कलनार्थं पुस्तकालयीयो विधिरुपयुज्यते । शोधप्रतिवेदनस्य निर्माणाय यथासम्भवं स्थापितानां सिद्धान्तानामाधारे प्राप्तसामग्रीणां विश्लेषणाय विश्लेषण-व्याख्यान-कार्य-कारणविधीनाञ्चात्र यथावसरमुपयोगो विहितो वर्तते । टिप्पणीकरणाय तथा सन्दर्भसूचीविधानाय लेखकमितिपद्धतेः (APA) अनुसरणं विहितमस्ति ।

## विषयविश्लेषणम्

**परिभाषायाः पदार्थस्वरूपनिरूपणम्**

विविधैः वैयाकरणैः व्याकरणशास्त्रसम्बद्धायां शास्त्रीयप्रक्रियायां सङ्गतिं स्थापयितुमनेकानि नियमवचनानि स्वीकृतानि दृश्यन्ते । तान्येवात्र परिभाषाशब्देन व्यवहृतानि विलोक्यन्ते । तथा च परिभाषाविषये लोकप्रसिद्धा उक्तिः वर्तते - 'परितः भाष्यते यस्मात् परिभाषाः ततः स्मृताः' इति । सर्वतोमुखेन विषयं या भासयति सा परिभाषा निगद्यते । यथा प्रदीपः गृहस्यैकदेशे स्थित्वा सर्वं गृहं प्रकाशयति तथैव परिभाषा शास्त्रस्यैकदेशे स्थित्वा प्रदीपवत् सर्वं शास्त्रस्य ज्ञानं प्रकाशयति । तथा चाह भाष्यकारः - 'यथा प्रदीपः एकदेशस्थः सर्वं वेश्ममभिज्वलयति इति' (पतञ्जलिः, षष्ठी स्थानेयोगा १।१।४ सूत्रे) वचनरूपेण पठिताः वाचनिकाः सूत्रैः सूत्रांशैर्वा ज्ञापिता ज्ञापकसिद्धा शास्त्रीयलोकव्यावहारिक-न्यायसिद्धाश्च परिभाषाः शास्त्रैकदेशो भूत्वा सर्वं शास्त्रस्थं ज्ञानं प्रकाशयन्ति । यः शास्त्रस्यैकं पक्षं पोषयति सः नियमः भवति । या शास्त्रस्य सर्वं पक्षं प्रकाशयति सा तु परिभाषाभवति ।

**परिभाषाणां प्रकाराः**

व्याकरणशास्त्रे द्विविधाः परिभाषा उपलभ्यन्ते सूत्रात्मिका वाचनिक्यश्च । सूत्रात्मिकाः परिभाषाः अष्टाध्यायां सूत्रात्मकरूपेण पठिताः भाष्ये काशिकादिषु च व्याख्याताः सन्ति । सूत्रात्मिकाः परिभाषाः 'वैयाकरणसिद्धान्तकौमुदी' ग्रन्थे भट्टोजी दीक्षितेन परिभाषाप्रकरणे स्थापिताः विद्यन्ते । तदतिरिक्ताः वाचनिक्यः परिभाषाः भाष्यवार्तिकादिषूपलभ्यन्ते । मनीषिभिः ता एव परिभाषा समाकलय्य व्याख्यानं विधाय 'परिभाषाप्रबोधः' 'परिभाषाप्रदीपार्चिः' 'परिभाषेन्दुशेखरः' इत्यादयः परिभाषविषयसम्बद्धा अनेके ग्रन्थाः विरचिताः दृश्यन्ते । एतेषु परिभाषासम्बद्धेषु ग्रन्थेषु प्रायेण शताधिकाः परिभाषाः समाकलिताः व्याख्याताः सन्ति । तत्र यथासन्दर्भं व्याकरणशास्त्रे समुपलभ्यमानानां ताषां परिभाषाणां प्रकाराश्चात्रोपस्थापिताः सन्ति ।

***सूत्रात्मिकाः परिभाषाः*** पाणिनिना स्वकीयामष्टाध्याय्यां सूत्ररूपेण रचिताः परिभाषाः सूत्रात्मिकाः वर्तन्ते । संज्ञा परिभाषा विधिः नियमः अतिदेशः अधिकारः इति षड्विधेषु सूत्रेषु एकतराणि पाणिनीयव्याकरणशास्त्रबोधोपयोगिभूतानि सूत्राणि परिभाषासूत्राणि मन्यन्ते । तानि परिभाषासूत्राणि व्याकरणशास्त्रप्रबोधनसन्दर्भे प्रदीपवत् शास्त्रं प्रकाशयन्ति । 'इको गुणवृद्धी' (पा.सू.१।१।३) 'षष्ठी स्थानेयोगाः' (पा.सू.१।१।४९) 'स्थानेऽन्तरतमः' (पा.सू.१।१।५०) 'अनेकाल् शित्सर्वस्य' (पा.सू.१।१।५५) 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (पा.सू.१।१।६६) सदृशाः पाणिनिविरचिताः सूत्रात्मिकाः परिभाषाः सन्ति ।

***वाचनिक्यः परिभाषाः*** पाणिन्युच्चरितभिन्नाः प्राचीनवैयाकरणग्रन्थेषु भाष्यवार्तिकादिषु निबद्धाः सूत्रैः सूत्रांशैर्वाज्ञापिता न्यायेन च सिद्धाः परिभाषा वाचनिक्यः सन्ति । आचार्येण नागेशेन परिभाषेन्दुशेखरे केवलवाचनिकीनां परिभाषाणामेव व्याख्यानं विहितम् । वाचनिकीनां परिभाषाणां स्वरूपं शेखरस्य भूतिटीकायामित्थं प्रप्यते -'सङ्केतगाहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्य ज्ञानानास्कन्दितबोधसकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरितन्नित्वम्' इति । अनेन ज्ञायते पाणिनिमुनिसम्मताः शास्त्रीयज्ञानावाप्तये सहायकाः पाणिन्युच्चरितभिन्नाः वचनाः वाचनिक्यः परिभाषाः सन्तीति ।

वाचनिक्यः परिभाषाश्च त्रिप्रकाकिाः भवन्ति - प्राचीनव्याकरणग्रन्थेषु भाष्यवार्तिकादिषु वचनरूपेण पठिताः वाचनिक्यः सूत्रैः सूत्रांशैर्वा ज्ञापिता ज्ञापकसिद्धाः, शास्त्रीयेन न्यायेन लोकन्यायेन च सिद्धाः न्यायसिद्धाश्च ।

***स्वतन्त्रवाचनिक्यः परिभाषाः*** प्राचीनवैयाकरणतन्त्रे वचनरूपेण पठिता भाष्यवार्तिकादिषु निबद्धाः परिभाषाः वाचनिक्यः सन्ति । मुनिना कात्यायनेन पाणिनेः अष्टाध्या्यामुपरि वार्तिकानि रचितानि । तेन पाणिनीयशास्त्रप्रबोधायोपयोगिभूताः परिभाषाः वचनरूपेण पठिताः आसन् । भाष्यकारेण पतञ्जलिना महाभाष्ये पठिताः तथा चान्यत्राष्टाध्याय्याः काशिकादिषु प्रचीनवृत्तिषु वचनरूपेण पठिताः परिभाषाः वाचनिक्यः सन्ति । एतादृशाः परिभाषाः सूत्रसिद्धाः वाचनिक्यस्तथा स्वतन्त्रवाचनिक्यश्च भवन्ति । तद्यथा- 'निर्दिश्यमानस्यादेशाः भवन्ति' इति परिभाषा पाणिनेः 'षष्ठी स्थानेयोगाः' (पा.सू.१।१।४९) सूत्रस्यावर्तनेन ज्ञाप्यते। तस्मादेषा सूत्रसिद्धा वाचनिकी परिभाषा वर्तते । 'यस्मिन् विधिस्तदादावल्ग्रहणे' परिभाषा 'येन विधिस्तदन्तस्य' (पा.सू.१।१।७२) सूत्रस्य भाष्ये वचनरूपेण पठिता विद्यते तस्मादेषा स्वतन्त्रवाचनिकी परिभाषाऽभिधीयते ।

***ज्ञापकसिद्धाः परिभाषाः*** या परिभाषा सम्पूर्णेन सूत्रेण सूत्रांशेन वा ज्ञापिता भवति सा परिभाषा ज्ञापकसिद्धा मन्यते । यथा 'अन्तरङ्गान्नपि विधीन् बहिरङ्गो लुग्वाधते' परिभाषा 'प्रत्ययोत्तरपदयोश्च' (पा.सू.७।२।९८)इति सम्पूर्णेन सूत्रेण ज्ञापिता वर्तते । तथा च 'असिद्धं बहिरङ्गमन्तरङ्गे' परिभाषा 'वाह ऊठ्' (पा.सू.६।४।१३२) सूत्रस्थेन 'ऊठ्' ग्रहणेन ज्ञापिता विद्यते । तत्र ऊठ् इति तु वाह ऊठ् सूत्रस्यैकदेशो सूत्रांशो वर्तते । तस्माद् सूत्रैः सूत्रांशैर्वा ज्ञापिताः परिभाषा ज्ञापकसिद्धा मन्यन्ते । तथैव 'स्थानेऽन्तरतमः' (पा.सू.१।१।५०) सूत्रे 'षष्ठी स्थाने योगाः' (पा.सू.१।१।४९) सूत्रतः 'स्थाने' इति पदमनुवर्तमाने पुनः स्थाने पदग्रहणेन 'यत्रानेविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषा ज्ञाप्यते । एतादृशाः पाणिनीयैः सूत्रैं सूत्रांशैर्वा ज्ञापिताः परिभाषा ज्ञापकसिद्धा मन्यन्ते ।

***न्यायसिद्धाः परिभाषाः*** नीयतेऽनया लोक इति न्यायः। न्यायशब्देन नीत्यनुकूलो व्यवहारोऽवगम्यते। न्यायेन नीत्यनुकूलेन व्यवहारेण सिद्धा परिभाषा न्यायसिद्धा मन्यते। न्यायसिद्धा परिभाषा सा भवति या लोकन्यायेन शास्त्रीयेन न्यायेन वा सिद्धा स्यात्। यथा 'यदागमस्तद्गुणीभूतास्तद्ग्रहणेन गृहन्ते' परिभाषा लोकन्यायसिद्धा वर्तते। लोकः यथा देवदत्तस्याङ्गाधिक्येऽपि देवदत्तनाम्नैव तं गृह्णाति तथैव व्याकरणशास्त्रे आगमविशिष्टस्यागमिनो बोधः आगमिग्रहणेन विधीयत इति परिभाषायाः विषयः वर्तते। एतेन पाणिनीयाव्याकरणपरम्परायां विविधा न्यायसिद्धाः परिभाषाः सुगुम्फिताः सन्तीति ज्ञायते। न्यासिद्धाः परिभाषाः स्रोतस आधारेण लोकन्यायसिद्धा शास्त्रीयन्यायसिद्धा इति द्विविधिा भवन्ति।

*लोकन्यायसिद्धाः परिभाषाः* आचार्येण नागेशेन परिभाषेन्दुशेखरे शास्त्रत्वसम्पादकोद्देशप्रकरणे, बाधबीजप्रकरणे शास्त्रशेष प्रकरणे च विभज्य परिभाषा व्याख्याताः सन्ति। शास्त्रत्वसम्पादनानन्तरमेव बाधाबाधयोः प्रतिपत्तिर्जायते तदनन्तरमेव शेषाणां शास्त्रत्वं सम्पद्यते। तस्मादत्र परिभाषाणां कार्यं विचार्य प्रकरणत्रयं निबद्धं विद्यते। तत्र त्रिष्वेव प्रकरणेषु ज्ञापकसिद्धा न्यायसिद्धा वाचनिक्यः परिभाषा व्याख्याताः सन्ति। पाणिनीयव्याकरणास्त्रपरम्परायां प्रचलिता लोकन्यायसिद्धाः परिभाषाश्चात्रोदाह्रियन्ते।

*क. एकदेशविकृतमनन्यवत्* : एकदेशो विकृतो यस्मिन् इति एकदेशविकृतः। वीत्युपसर्गपूर्वकात् कृधातोर्भावे क्तप्रत्ययेन विकृतशब्दो निष्पन्नः। अन्येन तुल्यम् अन्यवत्, न अन्यवत् अनन्यवत् इति विग्रहः। स्वावयवविकृतवान् अन्यवन्न भवति इति परिभाषार्थः। अर्थात् स्वावयवघटितः स्ववदेव भवतीति परिभाषाया आशयः वर्तते। यथा निर्गता जरा यस्य स इति विग्रहे समासे जराशब्दस्य ह्रस्वे कृते निर्जर शब्दो निष्पद्यते। अनेनैकदेशविकृतमनन्यवदिति परिभाषाबलेन तत्र निर्जर इत्यादौ ह्रस्वभूतः जरशब्दः जरा एव नान्यत् इति बोध्यते। तस्मात्तस्य जरासादेशो विधीयते।

यथा लोके छिन्ने पुच्छेऽपि शुनि श्ववदेव व्यवह्रियते, न तु गर्दभवद् नहि वृषभवत्। तथैवात्रशास्त्रेऽप्येकदेशः विकृतः शब्दो स्वावयवविकृतवान् शब्दोऽन्यशब्दवन्न भवति। सः एकदेशविकृतः शब्दः स्ववदेव भवतीति लोकव्यवहाराश्रयणेन लोकन्यायाश्रयणेन ज्ञायते। अतः पाणिनीयतन्त्रे प्रयुक्तेयं परिभाषा लोकन्यायसिद्धा।

*ख. एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः* - एकस्मिन् योगः एकयोगः, तेन निर्दिष्टानाम् एकयोगनिर्दिष्टानाम् इति पदस्य विग्रहो बोध्यः। अत्र वा शब्द एवार्थको विद्यते। यथा लोके एककार्यनियुक्तानामनेकव्यक्तीनां कार्येषु प्रवृत्तिर्निवृत्तिश्च सहैव भवति तथैवात्र शास्त्रेऽपि एकपदार्थेऽन्वितानामनेकपदार्थानां प्रवृत्तिर्निवृत्तिश्च सहैव भवतीति बोध्यते। एतेन यथा 'लिङ्सिचावात्मनेपदेषु' (पा.सू.१।२।११) इति सूत्रस्य 'ऋवर्णात्परौ झलादि लिङ् तथा तङ्परो सिच् च

कित्स्या'दित्यर्थः वर्तते । अत्र सूत्रे 'लिङ्सिचौ''आत्मनेपदेषु' इत्यनयोः पदयोः अन्वयः कित् पदेन सह विद्यते । परिभाषाबलेन सूत्रे कित् पदार्थे ऽन्वितयोः 'लिङ्सिचौ' 'आत्मनेपदेषु' इत्यनयोः पदयोः प्रवृत्तिः निवृत्तिश्च सहैव भवति । इयं परिभाषा लोकन्यायेन तथा 'नेड्वशिकृति ' (पा.सू.७।२।८) इति सूत्रात् 'इट्' इत्यनुवर्तमाने पुनः 'आर्धधातुकस्येड्वलादेः' (पा.सू.७।२।३५) सूत्रे इड् ग्रहणेन च सिद्धा (ज्ञापिता) विद्यते । तत्र 'इट्' पदार्थे ऽन्वितस्य 'न' पदार्थस्य निवृत्तये पुनरिड्ग्रहणं कृतं दृश्यते । अनया परिभाषया एव 'आर्धधातुकस्येड्वलादेः सूत्रे पुनरिड्ग्रहणस्य प्रयोजनं च प्रकाशितं भवति । तस्मादेतयोः प्रवृत्तिः निवृत्तिश्च सहै भवतीति लोकव्यवहाराश्रयणेनेयं परिभाषा सिद्धा भवति । तस्मादेषा च लोकन्यायसिद्धा विद्यते ।

*ग. यदागमस्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते* - यदागमस्तद्गुणीभूतास्तद्ग्रहणेन ज्ञाप्यन्ते । 'दाधाघ्वदाप्' (पा.सू.१।१।२०) इति सूत्रेण दा धा रूपाणां धातूनां घुसंज्ञा विधीयते । दा धातोः णिचि पुकागमे लटि दापयति रूपं भवति । तत्र प्र नि उपसर्गयोर्योगे घुसंज्ञकत्वात् प्रनिदापयति इत्यवस्थायां 'नेर्गदनद... ' (पा.सू.८।४।१७) इति सूत्रेण णत्वे कृते प्रणिदापयति-इति रूपं सिध्यति । अत्र णत्वे कर्तव्ये पुगागमविशिष्टस्य दाप् इत्यस्य 'दाधाघ्वदाप्' इति सूत्रेण दा धातोः विधीयमाना घुसंज्ञा 'अदाप्' इति निषेधादत्र नस्यादिति संशयः जायते । सूत्रे दा धा धातो आनुपूर्वी पाठो विद्यते । आनुपूर्वीपाठः विशिष्टरूपोपादनविषयः भवति । विशिष्टरूपोपादानविषये 'अर्थवद्ग्रहणे नानर्थकस्यग्रहणमि' ति परिभाषा प्रवर्तते । तस्मादत्र घुसंज्ञा न भवति, घुसंज्ञाया अभावे नेर्गनद.. इति सूत्रेण णत्वं च न सम्भवतीति तर्कावसरः वर्तते । तथा चाह परिभाषाकारः 'यदागमस्तद...' इति परिभाषाम् । यम् उद्दिश्य आगमो विहित स आगमस्तद्गुणीभूतस्तद्ग्रहणेनागमी ग्रहणेन गृह्यत इति परिभाषाया अर्थो वर्तते । अत्र दा धातो पुगागमो विहितः । अतो दा ग्रहणेन पुगागमविशिष्टस्य गुणीभूतस्य दाप् इत्यस्यापि ग्रहणं भवतीति परिभाषाबलेन बोधो भवति । एतेनात्र दाप् इत्यस्यापि घुसंज्ञा सिध्यति । यथा लोकेऽप्यङ्गाधिक्यस्य देवदत्तस्य देवदत्तग्रहणेन ग्रहणं भवति तथैव शास्त्रेऽपि आगमि ग्रहणेनागमविशिष्टिस्यापि ग्रहणं भवतीति लोकव्यावहारमाश्रित्यैषा परिभाषा शास्त्रेऽवतरिता विद्यते । अत इयं परिभाषा लोकन्यायसिद्धा मन्यते ।

*घ. व्यपदेशिवदेकस्मिन्* - एकस्मिन्नसहाये व्यपदेशिः मुख्यत्वव्यवहारः कर्तव्यः इति परिभाषायाः अर्थ वर्तते । एकाकी -असहायोऽपि सहायतुल्यो मुख्यत्वव्यवहारो लभते । यथा दक्षस्य अपत्यम् विग्रहे 'अत इञ्' (पा.सू.४।१।९५) सूत्रेण - अदन्तात् दक्षशब्दात् इञ् प्रत्ययो विधीयते । ततः दाक्षि इति पदं निष्पद्यते । दक्ष शब्दे द्+अ क्+ष्+अ वर्णाः सन्ति । एतेष्वकारोऽन्ते विद्यते, तस्मादेषोऽदन्तः वर्तते ।

तस्मादेवात्र इञ्प्रत्ययः सम्पद्यते । 'अकारो वासुदेवः स्यादि'ति कोशप्रमाणेन वासुदेववाचि 'अ' शब्दः कस्यापि अन्ते न विद्यते तस्मादत्र इञ् प्रत्ययः न स्यादिति शङ्कायामवतरति एषा परिभाषा । अत्राकार एकोऽसहायः विद्यते । तस्मादत्रादन्तवत् व्यवहारो विधातव्य इति परिभाषाया आशयः विद्यते । परिभाषाश्रयणादेवाकारादिञ् प्रत्यये इः इति रूपं सिध्यति । यथा लोके देवदत्तस्य एकपुत्रसत्वे तस्मै एव ज्येष्ठत्वकनिष्ठत्वव्यवहारो विधीयते परन्तु तस्य बहुपुत्रसत्वे एकस्मिन् ज्येष्ठत्वकनिष्ठत्वादिव्यवहारो न सम्पद्यते । तथैवात्र शास्त्रेऽपि बहुवर्णसत्वे ऽदन्तत्वमपेक्षते। एकस्मिन् सार्थके वर्णेऽसहाये तु तन्नापेक्षते इति लोकन्यायस्यावसरोऽवगम्यते । तस्मादेषा परिभाषा लोकन्यायसिद्धा वर्तते ।

*ङ. सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य* - द्वयोः सम्बन्धं निमित्तीकृत्य यो विधिरारभ्यते स विधिस्तस्य सम्बन्धस्य विनाशाय कारणं न भवतीति परिभाषार्थः । यथा 'शतानि' इत्यस्मिन् प्रयोगे शतशब्दाद् नपुंसके जसि तस्य शि आदेशे नुमागम उपधादीर्घे शतानि भवति तत्र 'शतान् +इ' इत्यवस्थायां नान्तत्वात् 'ष्णन्ताः षट्' सूत्रेण षट् संज्ञायामिकारस्य स्थानिवद्भावेन जस्त्वमादाय तस्य 'षड्भ्यो लुक्' सूत्रेण लुकि प्राप्ते शतजसयोः सम्बन्धेन जातो नुमागमस्तयोरेकतरस्य विघाताय कारणं न भवतीति सन्नितपातपरिभाषाश्रयणेन जसो विनाशाय नुम् निमित्तं भवितुं नार्हतीति ।

द्वयोः सम्बन्धः सन्निपातस्तन्निमित्तो विधि सन्निपातविधिस्तं सन्निपातं यो विहन्ति तस्मिन् निमित्तं भवितुं नार्हतीति । उपजीव्यस्य लोके विरोधमयुक्तं भवतीति भावः । तथैव शास्त्र उपजीव्यस्य विरोधोऽनुचितो भवतीति ज्ञापितेयं परिभाषा लोकन्यायेन सिद्धा विद्यते ।

*सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपायः* - एककार्याय नियुक्तयोर्द्वयोर्मध्य एकस्य निवृत्तिरिष्टा चेदपरस्यापि निवृत्तिः स्वतरिष्यत इति परिभाषार्थः । लोकव्यवहारे च एककार्याय नियुक्तयोर्जनयोर्मध्य एकस्य निवृत्तावपरस्यापि निवृत्तिर्भवति, तद्वद् व्याकरणशास्त्रेऽपि तादृशो व्यवहारोऽवलम्ब्यत इति परिभाषाया आशयो विद्यते । बिल्वकादिभ्यश्छस्य लुक् (६।४।१५३) सूत्रे छप्रत्ययस्य ग्रहणेनैषा परिभाषा ज्ञाप्यते । अत्र छमात्रस्य लुग्विधानेन कृतकुगागमस्य छस्य लुग्विधीयते, अत्र छप्रत्यय-कुगागमौ सन्नियोगशिष्टौ स्तः । तयोरेकस्यापाये (छस्य) अन्यतरस्याप्यपायः (कुकः) भवतीति परिभाषया साध्यते । यथा लोके एकस्मिन् कार्ये सहप्रवृत्तयोर्द्वयोर्मध्य एकस्य निवृत्तिरिष्यते चेदपरस्यापि स्वतः निवृत्तिरवगम्यते तथैव शास्त्रेऽप्येककार्ययोगस्य निवृत्तावन्यस्याप्यपायो विधीयते । एतेनेयं परिभाषा सूत्रांशेन ज्ञापिता तथा लोकन्यायसिद्धा च विलोक्यते ।

***शास्त्रीयन्यायसिद्धा परिभाषा*** - शास्त्रीयेन न्यायेन सिद्धा परिभाषा शास्त्रीयन्यायसिद्धा मन्यते । शास्त्रेषु यादृशो व्यवहारोवलम्ब्यते तादृशव्यवहारप्रयोजकः न्यायः शास्त्रीयः निगद्यते । शास्त्रीयन्यायसरण्या शास्त्रस्य विषयं सम्यगवगम्यते । पाणिनीयव्याकरणशास्त्रपरम्परायां शास्त्रीयन्यायसिद्धानां परिभाषाणामुपयोगः समुपलभ्यते । पाणिनीयाव्याकरणशास्त्रपरम्परायां प्रचलितानां मध्ये परिभाषेन्दुशेखरादौ व्याख्याता चैका शास्त्रीयन्यायसिद्धा परिभाषा अत्रोदाह्रियते ।

*अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्* : वह् धातोः क्तप्रत्यये वकारस्य सम्प्रसारणेनोकारे कृते ऊढ इति रूपं सिध्यति । ततः प्रोपसर्गेण योगे प्र+ऊढ इत्यवस्थायां 'प्रादूहोढोढेषैष्येषु' इति वार्तिकेन वृद्धौ प्रौढ इति सिध्यति । तथैव वह् धातोः क्तवतु प्रत्यये ऊढवान् इति रूपं भवति । ततः प्रोपसर्गयोगे प्र+ऊढवान् इत्यवस्थायाम् प्रादूहोढो...इति वार्तिकेन ऊढशब्दस्य परस्थत्वात् तत्रापि वृद्धिः स्यादिति शङ्का जायते । तत्र वार्तिके सार्थकस्य क्तप्रत्ययान्तस्य ऊढशब्दस्य ग्रहणं विद्यते । ऊढवान् इत्यत्र समुदाय एव सार्थकः न तु ऊढ इत्यंशमात्रम्। यत्र सार्थकस्य शब्दस्य ग्रहणं विद्यते तत्र तेन निरर्थकस्य शब्दस्य ग्रहणं न भवतीति शास्त्रीयस्य न्यायस्य विषयोऽनया परिभाषया स्थाप्यते । एतेनेयं परिभाषा शास्त्रीयन्यायसिद्धा वर्तते । शास्त्रे सार्थकशब्दप्रयोगे निरर्थकाः शब्दा न गृह्यन्ते । तथैवात्र निरर्थकस्य ऊढवान् इत्यस्यांशभूतस्य ऊढ इत्यस्य वार्तिकस्थेन सार्थकेन ऊढशब्देन ग्रहणं न भवतीति न्यायस्य विषयः प्रतिपद्यते । तस्मादेषा शास्त्रीयन्यायेन सिद्धा परिभाषा विद्यते ।

भोभगोअघोअपूर्वस्य योऽशि (पा.सू. ८-३-१७) सूत्रे सान्तानां भोस् भगोस् अघोस् रान्तानां वा सार्थकानां निपातानां ग्रहणमस्ति । तस्मादनेन सूत्रेणानर्थकानां भो भागो अघो शब्दानां ग्रहणं न विधीयते । तस्मादेव भो देवाः, भगो नमस्ते, अघो याहि इत्यादीनां सार्थकानामेव रोः रेफस्य यादेशः तदनन्तरं यादेशः सम्भवति । तस्मादेव विभोरिदम् (विभोः + इदम्) प्रभोरिदम् (प्रभोः + इदम्) सुप्रभगोरिदम् (सुप्रभगोः + इदम्) इत्यादौ भो भगो अघो शब्दे विद्यमानेऽपि तत्र तेषामनर्थकत्वात् सूत्रं न प्रवर्तते । एतच्च अर्थवद्ग्रहणपरिभाषायां सत्यामेव एव सम्भवति ।

## उपसंहारः

वैयाकरणस्य पाणिनेर्भाषानुशासने विशिष्टं योगदानमास्ते । अष्टाध्यायी पाणिनेर्व्याकरणविषयसम्बद्धा कालजयी कृतिर्विद्यते । पाणिनीयव्याकरणशास्त्रपरम्परायां मूलतो ग्रन्थानां दार्शनिकार्थिकप्रक्रियाभेदेन स्रोतस्त्रयमुपस्थितं प्राप्यते । आर्थिकदार्शनिकविषयौ परस्परसम्बद्धौ स्तः । तत्र 'वाक्यपदीयम्' 'वैयाकरणभूषणसारः' 'वैयाकरणसिद्धान्तमञ्जूषा' इति नामका दार्शनिका मुख्याः


शोधसुधा, वर्ष : १ अङ्क : १ (२०८०) ISSN -2990-7683 (Online)

कृतयो विलसन्ति । कात्यायनस्य वार्तिकानि पाणिनेः सूत्राणां परिपूरकाणि विद्यन्ते । अष्टाध्याय्या व्याख्यानभूतैः काशिकादिभिर्वृत्तिभिः प्रक्रियायाः विकासोऽजायत । पतञ्जलिर्महाभाष्यं विरचय्य सूत्रवार्त्तिकयोः सामञ्जस्यं विधाय विषयमिमं विस्तारयामास । भट्टोजिदीक्षितः 'वैयाकरणसिद्धान्तकौमुदी' ग्रन्थरत्नं विरचय्य प्रक्रियाक्रमं सारल्येन सुस्थापयामास । एभिर्मनीषिभिः सूत्रैः सूत्राणामर्थापने प्रयोगसाधने चानेका लौकिकव्यावहारिकतर्कमूला विविधाः परिभाषाः समाश्रिताः दृश्यन्ते । ताः पाणिनीयशास्त्रोपकारिका विद्यन्ते ।

पाणिनीयेषु व्याकरणशास्त्रेषु भाष्यवार्तिकादिषु वचनरूपेण पठिता वाचनिकाः, पाणिनीयैः सूत्रैः सूत्रांशैर्वा ज्ञापिताः ज्ञापकसिद्धाः, न्यायसिद्धाश्चानेकाः परिभाषाः विलसन्ति । आचार्यो नागेशस्ताः परिभाषाः समाकलय्य परिभाषेन्दुशेखरे त्रिषु प्रकरणेषु विभज्य व्याख्यायते । तत्र न्यायसिद्धाः परिभाषाः षट् सन्ति । कतिपयाः सूत्रैः सूत्रांशैः ज्ञापितास्तथा न्यायनीत्यनुकूलाश्च सन्ति । .........

सूत्रात्मिकाः परिभाषा अष्टाध्यायां सूत्ररूपेण (इको गुणवृद्धी, स्थानेऽन्तरतमः इत्यादीनि) पठिताः सन्ति । तद्भिन्ना महाभाष्ये तथा वार्तिकग्रन्थेषु च वचनरूपेण पठिताः परिभाषा वाचनिक्यः सन्ति । वाचनिक्यः परिभाषाश्च वचनरूपेण पठिताः, सूत्रैः सूत्रांशैर्वा ज्ञापिता ज्ञापकसिद्धास्तथा लोकन्यायेनानुमोदिता न्यायसिद्धाश्चेति त्रिधा सन्ति । एतासु न्यायसिद्धाः परिभाषा महत्त्वपूर्णाः सन्ति । तत्र ज्ञापकसिद्धानां बाधबीजभूतानां परिभाषाणाञ्चाध्ययनं पृथग्भवितुं सम्भवति । बह्वीनां न्यायसिद्धानां परिभाषाणामाधारो लोकन्यायो लोकव्यवहारश्च विलोक्यते । लोकानुकूलः शास्त्रीयो व्यवहार एव न्यायसिद्धपरिभाषाया आधारः प्रतिपद्यते । एताः परिभाषाः यथासन्दर्भं सूत्रार्थापने प्रयोगसाधने सन्देहनिवारणे चोपकुर्वन्ति ।

## सन्दर्भसामग्रीसूची


त्रिपाठी, हरिश्चन्द्रमणि (२०४६), *निपातार्थनिर्णयः,* सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ।

दीक्षितः, भट्टोजिः (सन् १९९६), *वैयाकरणसिद्धान्तकौमुदी,* (व्या.गोपालदत्त पाण्डेय, बालमनोरमासहिता, ३-४ भागः), चौखम्बा सुरभारती प्रकाशन ।

...., (२०५८), *वैयाकरणसिद्धान्तकौमुदी,* (पञ्चमसं.) (व्या.बालकृष्ण पञ्चोली, १-४ भागः), चौखम्बा संस्कृत संस्थानम् ।

...., (सन् १९९८), *प्रौढमनोरमा* (शब्दरत्नसहिता), चौखम्बा सुरभारती प्रकाशनम् ।

नागेशः, (सन् १९९१) *परिभाषेन्दुशेखरः* (विश्वनाथः मिश्रकृता सुबोधिनी हिन्दी व्यख्यासहितः), चौखम्बा सुरभारती प्रकशनम् ।

पतञ्जलिः, (सन् १९८७), *महाभाष्यम्,* (१-९ आह्निकम्), चौखम्बा संस्कृत प्रतिष्ठानम् ।

पाणिनिः, (सन् १९९७), *अष्टाध्यायी* (तृ.सं.), चौखम्बा सुरभारती प्रकाशन ।

पाणिनि (वि.सं. २०५५) *पाणिनीयशिक्षा,* (व्या.शिवराजआचार्यः कौडिन्यायनः) स्वाध्यायकुटुम्बशाला ।

भट्टः, कौण्डः (सन् २००४), *वैयाकरणभूषणसारः,* (व्या.बालकृष्णः पञ्चोली), आदर्श ग्रन्थमाला प्रकाशनम् ।

भर्तृहरिः, (सन् १९९०), *वाक्यपदीयम्,* चौखम्बा विद्याभवनम् ।

यास्कः, (सन् २००२), *निरुक्तम्,* चौखम्बा संस्कृत प्रतिष्ठानम् ।